# 2017

## M. A.

## 2nd Semester Examination

## SANSKRIT

## Paper – 202

*Full Marks* : 40

*Time* : 2 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**प्रश्नानां सर्वेषामुत्तरं संस्कृतेनैव प्रदेयम् ।**

1. श्रीहर्षस्य रचनाशैलीमवलम्ब्य कश्चन प्रबन्धो विरच्यताम् । 10

अथवा

'मनोरथेन स्वपतीकृतं नलं

निशि क्व सा न स्वपती स्म पश्यति'—

(Turn Over)

अनेन पद्यांशेन कस्याः सम्बन्धः संकेतितः ?

नलं प्रति तस्याः पूर्वरागः प्रथमसर्गमाश्रित्य प्रस्तूयताम् ॥

2. अमुष्य विद्या रसनाग्रनर्तकी 7

त्रयीव नीताङ्गगुणेन विस्तरम् ।

अगाहताष्टादशतां जिगीषया

नवद्वयद्वीपपृथग्जयश्रियाम् ॥

अथवा

अदस्तदाकर्णि फलाढ्यजीवितं

दृशोर्द्वयं नस्तदवीक्षि चाफलम् ।

इति स्म चक्षुःश्रवसां प्रिया नले

स्तुवन्ति निन्दन्ति हृदा तदात्मनः ॥

3. 'मार्गं तावच्छृणु'—केन कं प्रति उक्तिरेषा कृता ? मेघदूतदिशा तत्रोक्तस्य मार्गस्य वर्णना कार्या । 10

अथवा

मेघदूतमनुसृत्य अलकायाः शोभां समुपवर्णयत ।

4. सप्रसङ्गं व्याख्या कार्या — 7

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी

जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।

स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै

प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥

अथवा

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं

नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।

चूडापाशे नवकुरबकं चारु कर्णे शिरीषं

सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥

5. यथाभिमतं प्रश्नत्रयस्योत्तरं प्रदेयम् — 3×2

a) 'नैषधीयचरितम्'—इति महाकाव्यस्य उपजीव्यत्वं किमस्ति ?

b) 'याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा'— इत्यत्र 'अधिगुण' शब्देन कस्य बोधः भवति ?

c) 'प्रकृतिकृपणाश्चेतनाचेतनेषु'—इत्यत्र प्रकृतिकृपणः कः?

d) 'मेघदूतम्'—इति खण्डकाव्ये कैलासपर्यन्तं मेघस्य सहयात्रिणः के सन्ति ?

—o—